## राष्ट्रियशिक्षानीतिः संस्कृतपाठ्यक्रमश्च

**कार्यशालायाः तृतीयं दिनम् (24-11-2023)**

### प्रौद्योगिक्यां संस्कृतज्ञानां सक्तिः भवतु न तु विरक्तिः




Biotechnology, Biochemistry इत्यादयः विषयाः अद्यत्वे जीवशास्त्रादेव विकसिताः सन्ति। वेदादेव वेदान्तादीनि दर्शनानि प्रादुर्भूतानि । अष्टाध्यायीतः लघुसिद्धान्तकौमुदीं यावत् पाठ्यक्रमेषु परिवर्तनानि कालानुगुणं जातानि सन्ति। अतः नवशताब्देः शैक्षिकावश्यकतानुगुणं पाठ्यक्रमः परिष्कृत्य संस्कृतज्ञैः प्रयोक्तव्यः।

सर्वाधिकवृष्टिः मेघालये जायते। परं मेघदूते मेघालयस्य वर्णनमेव नास्ति। यतोऽहि रामगिरेः मार्गः अन्यः एव आसीत्। केवलं वाङ्मयस्य / भाषायाः उपरि एव ध्यानं केन्द्रीक्रियते चेत्तर्हि सामयिकविषयः नेपथ्यं गच्छेत्। अतः संस्कृतभाषाध्ययनमात्रेण तृप्ताः नैव भवेयुः। किञ्च भाषायाः वैज्ञानिकपक्षस्य विषये ध्यानं देयम्। प्राविधिकसंसाधनानां प्रयोगाभावात् अद्यत्वे लिप्यः विनष्टाः। शारदालिपिं नागरीं च जानानाः न्यूनाः जाताः। चिन्त्यम् ।

पञ्चम्यां षष्ठ्यां वा विज्ञानविषयं पाठयन्तं शिक्षकं भाषां पाठयन्तं च शिक्षकम् अवलोकयामः चेत्तर्हि अन्तरं दृश्यते। विज्ञानविषयशिक्षकस्य शिक्षणसंसाधनोपकरणादिषु कालानुगुणं परिवर्तनं दृश्यते। भाषाशिक्षकस्य शिक्षणसंसाधनोपकरणादिषु अपि परिवर्तनानि दृश्येरन्। विशिष्य संस्कृतज्ञाः प्रविधिना सम्पृक्ताः न भवन्ति बहुधा। नवसंस्कृतसन्ततिः प्रविधिना सम्पृक्ता भवेदेव । सङ्गणकभाषाविज्ञानस्य (CL) प्रचुरमात्रेण सन्निवेशः पाठ्यक्रमे भवेत्। वाण्याः अभिज्ञानाय ध्वनेः विश्लेषणाय च बालाः शिक्षणीयाः। यन्त्रानुवादः (MT) व्याकरणाधारितः अपि भवेत् कृत्रिमबुद्धिमत्तासम्बद्धोऽपि । एतत्सर्वं ज्ञेयमस्ति। अहं गच्छति इति उट्टङ्किते सति न्यूनातिन्यूनं गच्छति इत्येतत् वा रक्ताक्षरैः अङ्कितं भवेत्। एतादृशाः तन्त्रांशाः सज्जीकर्तव्याः । प्रौद्योगिक्यां संस्कृतज्ञानां सक्तिः भवतु न तु विरक्तिः।

समेषां शुभं भवतु ।



**डा. सुभाष चन्द्रः**

सहाचार्यः, संस्कृतविभागः

दिल्ली विश्वविद्यालयः

# शास्त्रान्वितं पुण्याय कल्पते




आचार्यनियमाः न उल्लङ्घनीयाः। कल्पनाप्रसूतस्यापि व्याकरणस्य नियमाः पालनीयाः। व्याकरणस्य आगमरूपम् अनुशासनरूपं च किम् ? इति विज्ञेयम्। पाणिनेः केशाः कीदृशाः आसन्? तस्य मातापितरौ कौ? इत्यादयः शोधविषयाः न भवेयुः। भाष्ये अप्रयुक्तं न पुण्याय न पापाय। शास्त्रान्वितं पुण्याय कल्पते । तत् ग्राह्यम्। तदेव गवेषणीयम् । पङ्गुवत् गमिष्यामि इति भावः यथा नागेशे आसीत् तथा गवेषके अपि स्यात्। शोधार्थं स्वीकृतस्य ग्रन्थस्य बहुधा आवृत्तिः अपि करणीया। कुत्र इति प्रश्नार्थकस्य अव्ययस्य स्थाने क्व इत्यस्य प्रयोगः भाष्यकारस्य। किमर्थम्? कस्य साधुत्वासाधुत्वविश्लेषणपद्धतिः उत्तमा ? इत्यपि गवेषणीयम्।

प्रत्यभिज्ञानस्य पर्यवासनम् अभिज्ञाने इति स्पष्टम्। सेयं शकन्तुला.... इत्यारभ्य किम् अभिजानासि माम् ! इत्येतावत् अभिज्ञानशाकुन्तलवचनं शोधच्छात्रैः विश्लेषणीयम्। असन्दिग्धानुष्ठानसिद्धिः शास्त्रेण जायते।अतः शास्त्रे यत्नः विधेयः। मर्कटलोचनः इति प्रयोगः निन्दार्थे एव इति अवैयाकरणः वदति। मर्कटेषु जन्तुषु लोचनः कृपाकटाक्षः यस्य अस्ति सः देवः इति स्तुतिरपि शक्या। व्युत्पत्तिः अनिवार्या । तदर्थं अध्ययनम् अनुसन्धानं च करणीयम्।





आचार्यः राम सलाही द्विवेदी

व्याकरणविभागाध्यक्षः

LBS- NSU

## संस्कृतं प्रबलं साधनम् अस्ति




श्रीमद्भगवद्गीता BioTechnology एव अस्ति।

**मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।**

**मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव।।7.7।।**

इत्येषः श्लोकः DNA विषये उदाहर्तुं शक्यते। भारतीयाः ज्वरः किमर्थं जायते इति तु अन्विष्टवन्तः। पाश्चात्याः ज्वरकारणम् अज्ञात्वा पीडोपशमनगुलिकां यच्छन्तः सन्ति ज्वरस्य वारणाय। विज्ञानस्य मूलं संस्कृतम्। अतः संस्कृतस्य वैज्ञानिकम् अध्ययनं करणीयम्। संस्कृतम् अस्माकं साधनम् अस्ति। साध्यं तु विशिष्टं वर्तते। अतः आदौ साधनसम्पन्नाः भवेम।



**श्रीमान् विवेक कौशिक**

सङ्घटनमन्त्री, संस्कृतभारती

दिल्ली

# प्रातिभासिकं व्याख्यानम्

## मातृकाः ग्रन्थकारस्य जीवनं कार्यं च प्रदर्शयन्ति



प्राच्यपाण्डुलिपिसङ्ग्रहालयेषु विद्यमानानां मातृकाणाम् अध्ययनं गवेषणं च करणीयम् । भारते कुत्र कुत्र मातृकाः सन्ति इति जानन्तु। तासां सङ्ग्रहं कुर्वन्तु । वैज्ञानिकक्रमेण शोधकार्यं कुर्वन्तु।


**आचार्या अनुपमा प्रष्ठी**

संयोजिका, शोधकेन्द्रम्

श्री सदाशिवपरिसरः , पुरी

## नवशिक्षानीतिदृशा अध्ययनानुसन्धानावसराः




युवयुवतीनां कृते संस्कृतम् अस्ति। शिक्षा केवलं वृत्तिलाभाय नास्ति। लोकोपकारप्रवृत्तिः शिक्षकेषु स्यात्। वेदोपनिषत्काव्येषु यल्लिखितं तत्सर्वं शिक्षानीतेः प्रतिवेदने साररूपेण वर्तते। अतः संस्कृतस्य शोधच्छात्राः एतत्सर्वं गवेषयेयुः।


**आचार्यः बुधेश्वर षडङ्गी**

संयोजकः, शोधकेन्द्रम्

सीताराम - आदर्शसंस्कृतमहाविद्यालयः, कलकत्ता